# संस्कृत वार्ता:

दिनाङ्क : 25/06/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- अद्य संविधान-हत्या-दिवसः आचर्यते; आपातकालकाले लोकतान्त्रिकमूल्यानां रक्षयन्तृभ्य: प्रधानमन्त्रिणा नरेन्द्रमोदिना श्रद्धाञ्जलिः समर्पिता।
- विदेश-कार्यमन्त्री डा.एस. जयशङ्करः वैश्विक-समस्यानां मध्ये दृढतरसहयोगस्य आवाहनं कुर्वन् दक्षिणकोरियादेशस्य जेजु-मञ्चे 'वसुधैव कुटुंबकम्' इत्यस्य उद्घोषश्च अकरोत्।
- भारतस्य ब्रिक्स-2026 इत्यस्य अध्यक्षतायाः अन्तर्गतं गुरुग्राम-नगरे ब्रिक्स-ऊर्जा-मन्त्रिणां सम्मेलनम् आरभत।
- वेनेजुएला-देशे एकस्यानन्तरम् अपरत्वेन प्रबलः भूकम्पः आगतः, येन बहूनि भवनानि पतितानि, देशेन आपातकालस्य च घोषणा कृता।
- दक्षिण-अफ़्रीकादेशः प्रथमवारं फ़ीफ़ा-विश्वचषक-क्रीडायाः नॉकआउट इति चरणं प्रति अगच्छत्, मोण्टेरे-नगरे दक्षिणकोरिया-देशं एकशून्याङ्काभ्यां पराजयत।
- अद्य सायङ्काले मैन्चेस्टर-नगरे आई. सी. सी.-महिला-टी-20-विश्वचषक-क्रिकेट-क्रीडायाः ग्रुप-ए-क्रीडायां भारतं बाङ्ग्लादेशेन सह क्रीडति।

---------------------------------------------------

<u>सम्विधान हत्या दिवसः</u>

अद्य संविधान-हत्या-दिवसः आचर्यते। पञ्चसप्तत्युत्तरैकोनविंशतितमे वर्षे जून्-मासस्य पञ्चविंशे दिनाङ्के यदा भारतस्य संविधानस्य पददलनं जातम्, तदा किं जातमिति एतत् दिनं स्मारयति। आपातकाले आधिक्येन पीडिताय प्रत्येकस्मै जनाय श्रद्धाञ्जलिं दातुम् अपि एषः दिवसः अस्ति। उपराष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी, गृहमन्त्री अमितशाहः च अद्य आपातकालस्य समये लोकतान्त्रिकमूल्यानां रक्षणार्थं दृढतया स्थितेभ्यः सर्वेभ्यः श्रद्धाञ्जलिम्

अर्पितवन्तः। सामाजिक-प्रसार-माध्यमे प्रधानमन्त्रिणा मोदिना उक्तम् यत् आपातकाल: संविधानस्य उपरि प्रत्यक्षः आक्रमणः आसीत्। सः अवदत् यत् अवसरेऽस्मिन् नागरिकस्वातन्त्र्यस्य निलंबनं, अभिव्यक्ति-स्वातन्त्र्यस्योपरि प्रतिबन्धः, राजनैतिकनेतृणां, पत्रकाराणां, सामाजिककार्यकर्तृणां च बन्धनम् अभवत्।

---------------------------------------------------

<u>भाजपा-आपातकाल</u>

भाजपेति दलेन अद्य आपातकालस्य विषये काङ्ग्रेस्-पक्षस्य उपरि प्रहारं कुर्वता भारतीय-इतिहासस्य कृष्णोऽध्यायः इत्युक्तम्। नवदेहली-नगरस्य पार्टी-मुख्यालये प्रसारमाध्यमान् सम्बोधयन्, भाजपेति दलस्य वरिष्ठः नेता रविशङ्करप्रसादः अवदत् यत् आपातकालस्य समये तत्कालीनप्रधानमन्त्री इन्दिरागान्धी-वर्यायाः आसन्दं रक्षितुं न्यायपालिकायाः उपरि आक्रमणं जातम्, प्रसारमाध्यमानि पीडितानि, विपक्षस्य नेतारः कारावासिनः कृताश्च। आपातकालकाले प्रधानमन्त्रिणः नरेन्द्रमोदीवर्यस्य भूमिकायाः प्रशंसां कुर्वन् श्रीप्रसादः अवदत् यत् मोदीवर्यः गुजराततः उत्तरभारतं यावत् उल्लेखनीयरूपेण प्रयत्नान् अकरोत् इति।

---------------------------------------------------

<u>पीएम-वाजपेयिनः कविताः</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना संविधान-हत्या-दिवसस्य अवसरे पूर्वप्रधानमन्त्रिणा अटलबिहारी-वाजपेयी-वर्येण लिखितायाः काव्यस्य पङ्क्तयः पठिताः। सामाजिक-प्रसार-माध्यमे श्रीमोदी अपठत् यत् एषा कविता न केवलं पङ्क्तिसङ्ग्रहः अपितु आपातकाले लोकतन्त्रस्य उपरि आरोपितायाः वेदनायाः, श्वसनावरोधस्य, प्रतिबन्धानाञ्च सजीव-अभिव्यक्तिः अस्तीति। सः अवोचत् यत् वाजपेयी-वर्यस्य कालातीतानि पद्यानि भारतस्य लोकतान्त्रिक-इतिहासस्य कृष्णतमेषु अध्यायेषु एकस्य कृते निरन्तरं स्वरं ददतीति।

---------------------------------------------------

<u>विदेशमन्त्री - कोरिया</u>

विदेशमन्त्री डॉ. एस. जयशङ्करः अवदत् यत् विश्वः अधुना अधिक-शस्त्रीकरणं, अधिक-समाह्वानानां स्वीकरणं, सामाजिक-माध्यम-युगाय उपयुक्तां राजनीतिं च पश्यति। दक्षिण-कोरिया-देशे 'जेजु-फोरम फॉर् पीस एण्ड प्रॉस्पेरिटी 2026' इति सम्मेलने सम्बोधयन् डॉ. एस्. जयशङ्करः वैश्विक-आव्हानानां निराकरणाय अधिक-अन्ताराष्ट्रिय-सहकार्यस्य आवश्यकताम् अपि उद्घोषयत्। "वसुधैव कुटुम्बकम्" इति भारतस्य प्राचीन-दर्शनम् उद्धृत्य, अधिक-सहकार्यपूर्ण-विश्व-व्यवस्थायाः निर्माणाय तमेव मार्गदर्शक-सिद्धान्तं निर्दिष्टवान् च।

---------------------------------------------------

## मनोहर - ब्रिक्स-सम्मेलनम्

हरियाणा-राज्यस्य गुरुग्रामे भारतस्य ब्रिक्स-अध्यक्षता 2026 अन्तर्गते द्विदिवसीयं ब्रिक्स-ऊर्जा-मन्त्रिणां सम्मेलनम् आरब्धम्। केन्द्रीय-विद्युत-मन्त्री मनोहर-लाल-खट्टरः अवदत् यत् आर्थिक-वृद्ध्यर्थं, सामाजिक-प्रगत्यर्थं मानव-विकासाय च ऊर्जा अत्यावश्यकी अस्ति।

---------------------------------------------------

## वेनेज़ुएला-भूकम्पः

वेनेजुएला-देशस्य राष्ट्रपतिपदासीना डेल्सी रोड्रिग्स्-वर्या अद्य प्रातःकाले कराकस-नगरं परितः क्षेत्रेषु च दशमलवद्वि-उत्तर सप्ततः सार्धसप्तमित-तीव्रतांकानां भूकम्पानां कारणेन बहूनि भवनानि भग्नीभूतानि येन देशे आपत्कालस्य घोषणां कृतवती। राष्ट्रपतिः अवदत् यत् शक्तिशालीभूकम्पानां श्रृङ्खलायाः अनन्तरं द्वात्रिंशज्जनाः मृताः, सप्तशततोऽधिकाश्च जनाः व्रणिताः सन्ति। एतन्निमित्तम् उपराष्ट्रपतिः सी. पी. राधाकृष्णन प्रधानमन्त्री नरेन्द्रमोदी च दुःखम् प्रकटितवन्तौ। सामाजिक-प्रसार-माध्यमे प्रधानमन्त्रिणा मोदिना उक्तम् यत् भारतं सर्वैः पीडितैः सह ऐक्येन स्थितम् अस्ति, सर्वेभ्यश्च यथासम्भव-साहाय्यं प्रदातुञ्च आश्वस्तिम् अददात्।

---------------------------------------------------

## पीएम-अमाजॉन सीईओ

प्रधानमन्त्री नरेन्द्रमोदी अद्य भारते अमेज़ोन्-संस्थायाः अष्टचत्वारिंशत् बिलियन्-डालर् इत्यस्य अभिलेख्य-निवेशस्य स्वागतम् अकरोत्। श्रीमोदी नवदेहल्याम् अमाजॉन -संस्थायाः मुख्य कार्यकारी अधिकारी एन्डी जेस्सी इत्येतमपि मिलितवान्।

---------------------------------------------------

## जापान-देशे भूकम्पः

अद्य प्रातः जापान-देशस्य ऐशान्य-भागे सप्त दशमलव द्वि तीव्रतायाः शक्तिशाली भूकम्पः अभवत्, येन न्यूनातिन्यूनं चत्वारः जनाः आहताः। इवाते-प्रान्तस्य पूर्व-तटे प्रायः चत्वारिंशत् किलोमीटर-मिते गाम्भीर्ये षट्-दशमलव-नव तीव्रतायाः कम्पनम् अभवत्। जापान-ऋतु-विज्ञान-संस्थायाः अनुसारं, जापानस्य सप्त-अङ्कीय-भूकम्पीय-मापके एषः उच्च-षट् इति द्वितीय-सर्वोच्च-स्तरं मापितवान्। कम्पनं टोकियो-सहितेषु अनेकेषु प्रान्तेषु अनुभूतम्, परन्तु सुनामी-चेतावनी न प्रसारिता। प्राधिकारिणः नाभिकीय-विद्युत-संयन्त्रेषु किमपि असामान्यं न प्रतिवेदितवन्तः, तथा च निवासिनः अग्रे अपि प्रबल-कम्पनानां कृते सतर्काः भवितुं परामृष्टाः।

---------------------------------------------------

## उपराष्ट्रपतिः-राज्यसभायाः शपथम्

उपराष्ट्रपतिः राज्यसभायाः सभापतिश्च सी. पी. राधाकृष्णन् वर्यः अद्य राज्यसभायाः नवनिर्वाचितान्, पुनः निर्वाचिताञ्च दशसदस्यान् सांसदत्वेन शपथम् अकारयत्।

---------------------------------------------------

## राष्ट्रपतिः, उपराष्ट्रपतिः, पीएम कोलकाता

राष्ट्रपतिपदासीना द्रौपदीमुर्मुः, उपराष्ट्रपतिः सी.पी. राधाकृष्णनवर्यः प्रधानमन्त्री नरेन्द्रमोदी च ह्यः कोलकाता-नगरे वेयरहाउस्-रूफ इति दुर्घटनायां मृतजनानाम् विषये दुःखम् प्रकटितवन्तः। प्रधानमन्त्रिणा नरेन्द्रमोदिना दुर्घटनायां मृतानां निकटवर्तिभ्यः द्विलक्षं रूप्यकाणि, व्रणितेभ्यश्च पञ्चाशत्-सहस्ररूप्यकाणाम् अनुग्रहधनस्य घोषणा कृता। सः अवदच्च यत् राज्यसर्वकारः प्रभावितेभ्यः सर्वविध-सम्भव-साहाय्यं निश्चेतुं अहोरात्रम् कार्यं कुर्वन्नस्तीति।

---------------------------------------------------

## गोयल्-यू. के. भ्रमणम्

वाणिज्य-उद्योग-मन्त्री पियूष गोयलः अद्य युनाइटेड् किङ्ग्डम्-देशस्य लन्दन्-नगरस्य त्रिदिवसीयां आधिकारिकयात्राम् आरभत। यात्रावधौ, सः भारत-यू. के. व्यापक-आर्थिक-व्यापार-अनुबन्धस्य अग्रिममासस्य पञ्चदश-दिनाङ्के प्रवृत्तस्य सहचर-द्विगुण-योगदान-सम्मेलनस्य च कार्यान्वयनस्य सज्जतायाः समीक्षां करिष्यति।

---------------------------------------------------

## फीफा-विश्वकपः

विश्व-पादकन्दुक-क्रीडायां, अद्य मॉन्टेरे-नगरे दक्षिण-कोरिया-विरुद्धं 1-0 इति अङ्केन विजयं प्राप्य दक्षिण- अफ्रीका प्रथमवारं फीफा-विश्वचषकस्य निर्णायक-चरणं प्रविष्टा। समूह-'अ'-क्रीडायां दक्षिण- अफ्रीकायाः कृते एकमात्रं गोलं थापेलो-मासेको इत्यनेन कृतम्।

---------------------------------------------------

## टी-20 विश्वकपः

भारतदेशम् विरुध्य बाङ्ग्लादेश: आईसीसी-महिला-टी-20-विश्वचषके, अद्य मैंचेस्टर-नगरस्थे एमिरेट्स-ओल्ड-ट्रैफर्ड-क्रीडाङ्गणे समूह-'अ'-क्रीडायां स्पर्धिष्यते। क्रीडा भारतीय-समयानुसारं सायं सप्तवादने आरप्स्यते।

।। इति वार्ता: ।।